श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये नवमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये नवमं दशकम् ॥

## जगत्सृष्टिप्रकारवर्णनम्

स्थितः स कमलोद्भवस्तव हि नाभिपङ्केरुहे
कुतस्विदिदमम्बुधावुदितमित्यनालोकयन्।
तदीक्षणकुतूहलात् प्रतिदिशं विवृत्तानन -
श्चतुर्वदनतामगाद्विकसदष्टदृष्ट्यम्बुजाम्॥ 9.1 ॥

महार्णवविघूर्णितं कमलमेव तत् केवलं
विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन्।
क एष कमलोदरे महति निस्सहायो ह्यहं
कुतः स्विदिदमम्बुजं समजनीति चिन्तामगात्॥ 9.2 ॥

अमुष्य हि सरोरुहः किमपि कारणं सम्भवे -
दिति स्म कृतनिश्चयस्स खलु नालरन्ध्राध्वना।
स्वयोगबलविद्यया समवरूढवान् प्रौढधी -
स्त्वदीयमतिमोहनं न तु कलेबरं दृष्टवान्॥ 9.3 ॥

ततस्सकलनालिकाविवरमार्गगो मार्गयन्
प्रयस्य शतवत्सरं किमपि नैव सन्दृष्टवान्।
निवृत्य कमलोदरे सुखनिषण्ण एकाग्रधीः
समाधिबलमादधे भवदनुग्रहैकाग्रही॥ 9.4 ॥

शतेन परिवत्सरैर्दृढसमाधिबन्धोल्लसत् -
प्रबोधविशदीकृतस्स खलु पद्मिनीसम्भवः।

अदृष्टचरमद्भुतं तव हि रूपमन्तर्दृशा
    व्यचष्ट परितुष्टधीर्भुजगभोगभागाश्रयम् ॥ 9.5 ॥

किरीटमकुटोल्लसत्कटकहारकेयूरयुङ् -
    मणिस्फुरितमेखलं सुपरिवीतपीताम्बरम् ।
कलायकुसुमप्रभं गलतलोल्लसत्कौस्तुभं
    वपुस्तदयि भावये कमलजन्मने दर्शितम् ॥ 9.6 ॥

श्रुतिप्रकरदर्शितप्रचुरवैभव श्रीपते
    हरे जय जय प्रभो पदमुपैषि दिष्ट्या दृशोः ।
कुरुष्व धियमाशु मे भुवननिर्मितौ कर्मठा -
    मिति द्रुहिणवर्णितस्वगुणबंहिमा पाहि माम् ॥ 9.7 ॥

लभस्व भुवनत्रयीरचनदक्षतामक्षतां
    गृहाण मदनुग्रहं कुरु तपश्च भूयो विधे ।
भवत्वखिलसाधनी मयि च भक्तिरत्युत्कटे -
    त्युदीर्य गिरमादधा मुदितचेतसं वेधसम् ॥ 9.8 ॥

शतं कृततपास्ततस्स खलु दिव्यसंवत्सरा -
    नवाप्य च तपोबलं मतिबलं च पूर्वाधिकम् ।
उदीक्ष्य किल कम्पितं पयसि पङ्कजं वायुना
    भवद्बलविजृम्भितः पवनपाथसी पीतवान् ॥ 9.9 ॥

तवैव कृपया पुनस्सरसिजेन तेनैव सः
    प्रकल्प्य भुवनत्रयीं प्रववृते प्रजानिर्मितौ ।
तथाविधकृपाभरो गुरुमरुत्पुराधीश्वर
    त्वमाशु परिपाहि मां गुरुदयोक्षितैरीक्षितैः ॥ 9.10 ॥

॥ इति श्रीमन्नारायणीये नवमं दशकं समाप्तम् ॥